# द्वितीयपत्रम्

## साहित्यम्

समय: घण्टात्रयम् पूर्णाङ्का: 100

अ. सर्वे प्रश्ना: समाधेया:। (20×2=40)

1. करिणी कुत्र अवसीदति?
2. "किरातार्जुनीयम्" शब्दस्यास्य का व्युत्पत्ति:?

**अथवा**

को नयेन जगतीं जेतुं समीहते?

3. "वृकोदर:" अस्य शब्दस्य कोऽभिप्राय:?
4. कति उपविद्या:?
5. काव्यमीमांसाया: प्रथमाधिकरणस्य प्रथमोऽध्याय: क:?
6. "शिवारुतै:" अस्य कोऽर्थ:?

**अथवा**

विपद: कम् अभिभवन्ति?

7. "इतीरयित्वा" अत्र कथं सन्धिच्छेद:?
8. वनेचर: कीदृशं वाचम् आददे?
9. विजयार्थिन: क्षितीशा: किं विदधति?
10. काव्यमीमांसाया: कति अधिकरणानि?

11. कामदेव: किं रचयामास ?

12. अभ्यास: क: ?

13. "ननु वक्तृविशेषनि:स्पृहा गुणगृह्या वचने विपश्चित:" कस्येदं वचनम् ?

14. "निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धय:" इत्यत्र कोऽलङ्कार: ?

**अथवा**

"आपगारय:" इत्यस्य कोऽर्थ: ?

15. सुयोधन: अनुजीविन: कथं दर्शयते ?

16. अनेकराजन्यरथाश्वसङ्कुलं किम् ?

17. शमीतरुं को ज्वलयति ?

**अथवा**

कतिविधा कथा ?

18. कानि पञ्चाङ्गानि ?

19. का नाम तितिक्षा ?

**अथवा**

"विघाताय" इत्यत्र का विभक्ति: ?

20. "क्व भूपतीनां चरितं क्व जन्तव:" वचनमिदं क: कं प्रति कथयति ?

ब. सर्वे प्रश्नाः समाधेयाः। (5×8=40)

21. पुराणलक्षणं प्रतिपाद्य इतिहासपुराणयोः भेदं प्रतिपादयत।

22. "परिणामसुखे गरीयसी व्यथकेऽस्मिन् वचसि क्षतौजसाम्।

अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः" ॥

पद्यमिमम् अन्वयभावार्थव्याख्यापुरस्सरं व्याख्यात।

23. प्रतिभां ग्रन्थोक्तदिशा विशदीकुरुत।

अथवा

"वरं विरोधोऽपि समं महात्मभिः" सूक्तिरियं सप्रसङ्गं व्याख्येया।

24. व्रजन्ति ते मूढधियः पराभवं,

भवन्ति मायाविषु ये न मायिनः।

प्रविश्य हि घ्नन्ति शठास्तथाविधान्

असंवृत्ताङ्गान्निशिता इवेषवः॥

अमुं श्लोकं व्याख्यात।

अथवा

भारवेः राजनीतिविषयकं ज्ञानं प्रकटयत।

25. "सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम्" अस्य भावो लेख्यः।

अथवा

"इमामहं वेद न तावकीं धियं
विचित्ररूपाः खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाश्रयः॥"

अन्वयव्याख्याभावार्थपुरस्सरं पद्यमिमं व्याख्यात।

**स. कश्चनैकः प्रश्नः समाधेयः।** (1×20=20)

26. महाकविभारवेः काव्यसौष्ठवं प्रतिपादयत।

अथवा

"भारवेरर्थगौरवम्" इति विशदीकुरुत।

अथवा

काव्यमीमांसायाः सामान्यपरिचयो लेख्यः।